No. १५३६

Title पदार्थ धर्म संग्रहे द्रव्य पदार्थः

Author ×

Extent ६ Age ×

Subject न्यायशास्त्रं

पदार्थधर्मसंग्रहे द्रव्यपदार्थः

१५३६

॥श्रीगणेशाय नमः॥ श्रीगणेशायनमः

॥१॥ न्यायवला २०

वसकुमहृदयेविराजमानं

समद्वीपवतिरविरश्मजालसंचय ... सा

श्रीगणेशायनमः

श्रीगणेशायनमः

[illegible]॰भा॰प॰ श्रीगणेशाय नमः ॥ ॥ प्रणम्य हेतुमीश्वरं मुनिं कणादमन्वतः । पदार्थधर्मसंग्रहः प्रवक्ष्यते महोदयः ॥१॥ द्रव्यगुणकर्मसामान्य
विशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानं निःश्रेयस[illegible]हेतुः । तच्चेश्वरचोदनाभिव्यक्ताद्धर्मादेव । अथ के
द्रव्यादयः पदार्थाः किं च तेषां साधर्म्यवैधर्म्यं चेति । तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि सामान्य
विशेषसंज्ञोक्तानि नवैव । तद्व्यतिरेकेण संज्ञान्तरानभिधानात् । गुणाश्च रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोग
विभागपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नाश्चेति कंठोक्ताः सप्तदश । चशब्दसमुच्चिताश्च गुरुत्वद्रवत्वस्नेहसंस्कारा
दृष्टशब्दाः सप्तैवेति एवं चतुर्विंशतिर्गुणाः । उत्क्षेपणापक्षेपणाकुंचनप्रसारणगमनानि पंचैव कर्माणि । गमनग्रहणाद्भ्रम ॥१॥
णरेचनस्पंदनोर्ध्वज्वलनतिर्यक्पवननमनोन्नमनादयो गमनविशेषा एव न तु जात्यंतराणि । सामान्यं द्विविधं परमपरं
च । तत्रानुवृत्तिप्रत्ययकारणं । तत्र परं सत्ता महाविषयत्वात् । सा चानुवृत्तेरेव हेतुत्वात्सामान्यमेव । द्रव्यत्वाद्यपरं अल्प
विषयत्वात् । तच्च व्यावृत्तेरपि हेतुत्वात्सामान्यं विशेषाख्यामपि लभते । नित्यद्रव्यवृत्तयोऽन्त्या विशेषाः । ते खल्वत्यंतव्या
वृत्तिबुद्धिहेतुत्वाद्विशेषा एव । अयुतसिद्धानामाधार्याधारभूतानां यः संबंधः इहेतिप्रत्ययहेतुः स समवायः ।
एवं धर्मैर्विना धर्मिणामुद्देशः कृतः । षण्णामपि पदार्थानां साधर्म्यमस्तित्वाभिधेयत्वज्ञेय

त न५ मपि

४ त्यविशेषवत्त्वं नित्यत्वमर्थशब्दानभिधेयत्वं चेति। पृथिव्यादीनां नवानामपि द्रव्यत्वयोगः स्वात्म

त्र्यं ५

नि प २ तो

त्वानि। आश्रितत्वं चान्यत्र द्रव्येभ्यः। द्रव्यादीनां पञ्चानामपि समवायित्वमनेकत्वं च। गुणादीनां पञ्चानामपि निर्गुणत्वनिष्क्रियत्वे
द्रव्यादीनां त्रयाणामपि सत्तासंबन्धः। सामान्यविशेषवत्त्वं स्वसमयार्थशब्दाभिधेयत्वं धर्माधर्मकर्तृत्वं च। कार्यत्वानित्य-
त्वे कारणवतामेव। कारणत्वं चान्यत्र पारिमाण्डल्यादिभ्यः। द्रव्याश्रितत्वं चान्यत्र नित्यद्रव्येभ्यः। सामान्यादीनां त्रयाणामपि
स्वात्मसत्त्वं बुद्धिलक्षणत्वं अकार्यत्वमकारणत्वमसामान्यारंभकत्वं गुणवत्त्वं कार्यकारणाविरोधित्वमन्त्यविशेषवत्त्वं अना-
श्रितत्वनित्यत्वे चान्यत्रावयविद्रव्येभ्यः॥ पृथिव्युदकज्वलनपवनात्ममनसामनेकत्वापरजातिमत्त्वे। क्षितिज्योतिरनिल-
मनसां क्रियावत्त्वमूर्तत्वपरत्वापरत्ववेगवत्त्वानि। आकाशकालदिगात्मनां सर्वगतत्वं परममहत्त्वं सर्वसंयोगिसमान-
देशत्वं च। पृथिव्यादीनां पञ्चानामपि भूतत्वेन्द्रियप्रकृतित्वबाह्यैकैकेन्द्रियग्राह्यविशेषगुणवत्त्वानि। चतुर्णां द्रव्या-
रंभकत्वस्पर्शवत्त्वे। त्रयाणां प्रत्यक्षत्वरूपवत्त्वद्रवत्वानि। द्वयोर्गुरुत्वं रसवत्त्वं च। भूतात्मनां वैशेषिकगुणव-
त्त्वं। क्षित्युदकात्मनां चतुर्दशगुणवत्त्वं। आकाशात्मनां क्षणिकैकदेशवृत्तिविशेषगुणवत्त्वं॥ दिक्कालयोः पञ्चगुणव-
त्त्वं सर्वोत्पत्तिमतां निमित्तकारणवत्त्वं॥ क्षितितेजसोर्नैमित्तिकद्रवत्वयोगः। एवं सर्वत्र साधर्म्यं विपर्ययाद्वै-
धर्म्यं चेति। इहे [illegible] तानीमेकैकशो वैधर्म्यमुच्यते। पृथिवीत्वाभिसंबन्धात् पृथिवी। रूपरसगन्धस्पर्शसंख्यापरि-

मर्गो

त०भा० माणत्वपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वसंस्कारवती। एतेन गुणविनिवेशाधिकारे रूपादयो विशेषगुणाः
सिद्धाः। वायुवधनात्संस्कारः। क्षितावेव गन्धः। रूपमनेकप्रकारं शुक्लादि। रसः षड्विधो मधुरादिः। गन्धो
२ द्विविधः सुरभिरसुरभिश्च। स्पर्शोऽस्या अनुष्णाशीतत्वे सति पाकजः। सा च द्विविधा नित्या चानित्या च। प
रमाणुलक्षणा नित्या कार्यलक्षणा त्वनित्या। सा च स्थैर्याद्यवयवसंनिवेशविशिष्टा। अपरजातिबहुलो
ने४ पेता। शयनासनाद्यनेकोपकारकरी च। त्रिविधं चास्याः कार्यं शरीरेन्द्रियविषयसंज्ञकं। तत्र शरीरं द्विविधं
२ योनिजमयोनिजं च। तत्रायोनिजमनपेक्ष्य शुक्रशोणितं देवर्षीणां शरीरं। धर्मविशेषसहितेभ्योऽणुभ्यो जा
यते। क्षुद्रजन्तूनामपि यातनाशरीराण्यधर्मविशेषसहितेभ्योऽणुभ्यो जायंते। शुक्रशोणितसंनिपातजं योनि
जं। तच्च द्विविधं जरायुजमण्डजं च। मानुषपशुमृगाणां जरायुजं। पक्षिसरीसृपाणामण्डजं। इंद्रियं गंधव्यंज
कं सर्वप्राणिनां जलाद्यनभिभूतैः पार्थिवावयवैरारब्धं घ्राणं। विषयस्तु द्व्यणुकादिक्रमेणारब्धस्त्रिविधो मृ
त्पाषाणस्थावरलक्षणः। तत्र भूप्रदेशाः प्राकारेष्टकादयो मृद्विकाराः। पाषाणा [illegible] मणिवज्रादयः

४ जोवयवैरारब्धं चक्षुः। विषयसंज्ञकं चतुर्विधं। भौमं दिव्यं औदर्यमाकरजं चेति। तत्र भौमं काष्ठेंधनप्रभवं ज्वलनस्वभा ४९
स्थावरास्तृणौषधिवृक्षगुल्मलतावतानवनस्पतय इति। अप्त्वाभिसंबंधादापः॥ रूपरसस्पर्शसंख्यापरि
माणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहसंस्कारवत्यः। एते च पूर्ववत्सिद्धाः। शुक्लमधुरशी
ता एव रूपरसस्पर्शाः। स्नेहोंभस्येव। सांसिद्धिकं च द्रवत्वं। तास्तु पूर्ववद्द्विविधाः। नित्या नित्याश्च। कार्यं च पुनः
त्रिविधं शरीरेंद्रियविषयसंज्ञकं। तत्राप्ययोनिजमेव शरीरं वरुणलोके। पार्थिवावयवोपष्टंभाच्चोपभोगसमर्थं
इंद्रियं सर्वप्राणिनां रसोपलब्धिनिमित्तमन्यावयवानभिभूतैर्जलावयवैरारब्धं रसनं। विषयस्तु द्व्यणुकादि
प्रक्रमेणारब्धः सरित्समुद्रहिमकरकादिरिति। तेजस्त्वाभिसंबंधात्तेजः। रूपस्पर्शसंख्यापरिमाणपृथक्त्व
संयोगविभागपरत्वापरत्वद्रवत्वसंस्कारवत्। पूर्ववदेषां सिद्धिः। शुक्लं भास्वरं च रूपं। उष्ण एव स्पर्शः।
नैमित्तिकं द्रवत्वं। तदपि द्विविधं अणुकार्यभावात्। कार्यं च शरीरादित्रयं। शरीरमयोनिजमेव सूर्यलो
के। तेजोवयवैरारब्धं। पार्थिवावयवोपष्टंभाच्चोपभोगसमर्थं। इंद्रियं रूपव्यंजकमन्यावयवानभिभूतैस्तै
वकं। पवनेन सा नादिसमर्थं। दिव्यमबिंधनं सौरं विद्युदादि। उदर्यं भुक्तस्याहारस्य रसादिपरिणामार्थं। आक

कारजंसुवर्णादि।तत्रसंयुक्तसमवायाद्रसाद्युपलब्धिरिति।वायुत्वाभिसंबंधाद्वायुः॥स्पर्शसंख्यापरिमाण
पृथक्त्वसंयोगविभागपरत्वापरत्वसंस्कारवान्।स्पर्शोस्यानुष्णाशीतत्वेसत्यपाकजः।सचगुणविनिवेशा
धिकारेसिद्धः।अरूपिष्वचाक्षुषवचनात्सप्तसंख्यादयः।तृणकर्मवचनात्संस्कारः।सचायंद्विविधोनित्यो
नित्यश्चेति।अणुकार्यभावात्।कार्यलक्षणश्चतुर्विधः।शरीरमिंद्रियंविषयःप्राणइति।तत्रशरीरमयोनिज
मे[illegible]रुलोके।पार्थिवावयवोपष्टंभाच्चोपभोगसमर्थं॥इंद्रियंसर्वप्राणिनांस्पर्शोपलंभकं।पृथिव्याद्यन
भिभूतैर्वाय्ववयवैरारब्धं।सर्वशरीरव्यापित्वगिंद्रियं।विषयस्तूपलभ्यमानस्पर्शाधिष्ठानभूतोद्व्यणुका
दिप्रक्रमेणारब्धः।स्पर्शशब्दधृतिकंपलिंगः।तिर्यग्गमनस्वभावकोमेघादिप्रेरणधारणादिसमर्थः।
तस्याप्रत्यक्षस्यापिनानात्वंसंमूर्छनेनानुमीयते।संमूर्छनंपुनःसमानजवयोर्वाय्वोर्विरुद्धदिक्क्रिययोः
संनिपातः।सोपितृणादिगमनेनानुमितेनसावयविनोरूर्ध्वगमनेनानुमीयते।प्राणोंतःशरीरेरसमलधा
तूनांप्रेरणादिहेतुः।एकःसन्क्रियाभेदादपानादिसंज्ञांलभते।चतुर्णांमहाभूतानांसृष्टिसंहारविधिरुच्यते।
ब्राह्मेणमानेनवर्षशतांतेवर्तमानस्यब्रह्मणोपवर्गकालेसंसारखिन्नानांप्राणिनांनिशिविश्रामार्थंसकलभुव
नपतेर्महेश्वरस्यसंजिहीर्षासमकालं[illegible]

पनिबंधकानां सार्वात्मगतानामदृष्टानां वृत्तिनिरोधे सति महेश्वरेच्छात्माणुसंयोगजकर्मभ्यः शरीरेंद्रियकारणाणुवि
भागेभ्यः तत्संयोगनिवृत्तौ शरीरेंद्रियाणामापरमाण्वंतो विनाशः। तथा पृथिव्युदकज्वलनपवनानामपि महा
भूतानामनेनैव क्रमेणोत्तरस्मिन्नुत्तरस्मिन् पूर्वस्य पूर्वस्य विनाशः। ततः प्रविभक्ताः परमाणवोऽव
तिष्ठंते। धर्माधर्मसंस्कारानुविद्धा आत्मानस्तावन्तमेव कालं। ततः पुनः प्राणिनां भोगभूतये महेश्वरसिसृक्षानं
तरं सर्वात्मगतवृत्तिलब्धादृष्टापेक्षेभ्यस्तत्संयोगेभ्यः पवनपरमाणुषु कर्मोत्पत्तौ तेषां परस्परसंयोगेभ्यो द्व्यणुकादिक्रमे
णोत्पन्नो महान्वायुर्नभसि दोधूयमानस्तिष्ठति। तदनंतरं तस्मिन्नेव वायौ तैजसेभ्यः परमाणुभ्यो द्व्यणुकादिप्रक्रमेणो
त्पन्नो महांस्तेजोराशिर्दीदीप्यमानस्तिष्ठति। ततस्तस्मिन्नेव तेजोराशावाप्येभ्यः परमाणुभ्यो द्व्यणुकादिप्रक्रमेणोत्प
न्नो महान्सलिलराशिरुत्पन्नः। पोप्लूयमानस्तिष्ठति। तदनंतरं तस्मिन्नेव महोदधौ पार्थिवेभ्यः परमाणुभ्यो द्व्य
घ णुकादिप्रक्रमेणोत्पन्ना पृथिवी संहतावतिष्ठते। एवमुत्पन्नेषु चतुर्षु महाभूतेषु महेश्वरस्याभिध्यानमात्रा
त्तैजसेभ्योऽणुभ्यः पार्थिवपरमाणुसहितेभ्यो महदंडमारभ्यते। तस्मिंश्चतुर्वदनकमलं सर्वलोकपितामहं
ब्रह्माणं सर्वभुवनसहितमुत्पाद्य प्रजासर्गे विनियुंक्ते। स च महेश्वरेण विनियुक्तो ब्रह्मातिशयज्ञानवैराग्यैश्वर्य

प्रश॰भा॰

समवायानुश्र॥

5

संपन्नः प्राणिनां कर्मविपाकं विदित्वा कर्मानुरूपज्ञानभोगायुषः सुतान्प्रजापतीन्मनुदेवर्षीन्पितृगणान्मुखबाहूरुपादतश्चतुरोवर्णा

न्यान्युच्चावचानि भूतानि सृष्ट्वा आशयानुरूपैर्धर्मज्ञानवैराग्यैश्वर्यैः संयोजयतीति॥ आकाशकालदिशामेकैकत्वादपरजात्यभावे पारिभा

षिक्यस्तिस्रः संज्ञा भवन्ति आकाशं कालो दिगिति। तत्राकाशस्य गुणाः शब्दसंख्यापरिमाणपृथक्त्वसंयोगविभागाः शब्दः प्रत्यक्षत्वे स

१७ त्यकारणगुणपूर्वकत्वात्तद्यावद्द्रव्यभावित्वादाश्रयादन्यत्रोपलब्धेश्च न स्पर्शवद्विशेषगुणः बाह्येन्द्रियप्रत्यक्षत्वादात्मान्तरग्राह्यत्वा

दात्मन्यहंकारेण विभक्तत्वाच्च नात्मगुणाः। श्रोत्रग्राह्यत्वाद्वैशेषिकगुणान्तर्भावान्न दिक्कालमनसां पारिशेष्याद्गुणो भूत्वा आकाशस्या ॥५

धिगमे लिङ्गं शब्दलिङ्गाविशेषादेकत्वं सिद्धं तदनुविधानात्पृथक्त्वं विभववचनात्परममहत्परिमाणं शब्दकारणवचनात्संयो ॥५

गविभागौ। अतो गुणवत्त्वादनाश्रितत्वाच्च द्रव्यं। समानासमानजातीयकारणाभावाच्च नित्यं। सर्वप्राणिनां च शब्दोपलब्धौ नि

5 मित्तं श्रोत्रभावेन श्रोत्रं पुनः श्रवणविवरसंज्ञको नभोदेशः शब्दनिमित्तोपभोगप्रापकधर्माधर्मोपनिबद्धः तस्य च नित्यत्वे सत्युपनिबन्धक

ह्विति २ गु३

वैकल्याद्वाधिर्यमिति ॥ कालः परापरव्यतिकरयौगपद्यायौगपद्यचिरक्षिप्रप्रत्ययलिङ्गः । तेषां विषयेषु पूर्वप्रत्ययविलक्षणानामुत्पत्तावसंभवाद्यदत्र निमि-
त्तं स कालः सर्वकार्याणामुत्पत्तिस्थितिविनाशहेतुः तद्व्यपदेशात्क्षणलव । निमेषकाष्ठाकलामुहूर्तयामाहोरात्रार्धमासमासर्त्वयनसंवत्सरयुगकल्पमन्वंतरप्रल-
यमहाप्रलयव्यवहारहेतुश्च तस्य गुणाः संख्यापरिमाणपृथक्त्वसंयोगविभागाः । काललिंङ्गाविशेषादेकत्वं सिद्धं । तदविधानात्पृथक्त्वं कारणे काल इति वचना-
त्परममहत्परिमाणं । कारणपरत्वादिति वचनात्संयोगः । तद्विनाशकत्वाद्विभाग इति । तस्याकाशवद्द्रव्यत्वनित्यत्वे सिद्धे काललिंगाविशेषादञ्जसैकत्वे सिद्धेपि
सर्वकार्याणां प्रारंभक्रियाभिनिर्वृत्तिस्थितिनिरोधोपाधिभेदान्मणिवत्पाचकवद्वा नानात्वोपचार इति । दिक्पूर्वापरादिप्रत्ययलिङ्गा । मूर्तद्रव्यमवधिं कृ-
त्वा मूर्तेष्वेव द्रव्येष्वेतस्मादिदं पूर्वेण दक्षिणेन पश्चिमेनोत्तरेण पूर्वदक्षिणेन दक्षिणापरेण अपरोत्तरेण उत्तरपूर्वेणाधस्तादुपरिष्टाच्चेति दश प्रत्यया यतो भ-
वंति सा दिक् । अन्यनिमित्तासंभवात् । तस्यास्तु गुणाः संख्यापरिमाणपृथक्त्वसंयोगविभागाः कालवदेते सिद्धाः । दिग्लिंगाविशेषादञ्जसैकत्वे स्थितेपि दि-
शः परमर्षिभिः श्रुतिस्मृतिलोकव्यवहारार्थं मेरुं प्रदक्षिणमावर्तमानस्य भगवतः सवितुर्ये संयोगविशेषास्तेषां लोकपालपरिगृहीतदिक्प्रदेशानाम-
न्वर्थप्राच्यादिभेदेन दशविधाः संज्ञाः कृताः ततो भक्त्या दश दिशः सिद्धाः । तासामेव देवतापरिग्रहवशात्पुनर्दश संज्ञा भवंति । महेंद्री वैश्वानरी याम्या नैरृ-
ती वारुणी वायव्या कौबेरी ऐशानी ब्राह्मी नागी चेति ॥ ॥ आत्मत्वाभिसंबंधादात्मा । तस्य सौक्ष्म्यादप्रत्यक्षत्वेपि करणैः शब्दाद्युपलब्ध्यानुमितैः

द्र०आ०
॥५॥
5-

श्रोत्रादिभिः समधिगमः क्रियते । वास्यादीनामिव करणानां प्रयोक्तृत्वदर्शनात् । शब्दादिषु प्रसिद्ध्या च प्रसाधको ऽनुमीयते । न शरीरेंद्रियमनसामज्ञत्वात् ।
न शरीरस्य चैतन्यं घटादिवद्भूतकार्यत्वात् । मृतेष्वसंभवात् । नेंद्रियाणां करणत्वात् उपहतेषु विषयासान्निध्ये चानुस्मृतिदर्शनात् । नापि मनसः [illegible]
करणानपेक्षत्वे युगपदालोचनस्मृतिप्रसङ्गात् । स्वयं करणभावाच्च । तेन पारिशेष्यादात्मकार्यत्वादात्मा समधिगम्यते । शरीरसमवायिनी-
भ्यां हिताहितप्राप्तिपरिहारयोग्याभ्यां प्रवृत्तिनिवृत्तिभ्यां रथकर्मणा सारथिवत् प्रयत्नवान् विग्रहस्याधिष्ठातानुमीयते । प्राणादिभिश्चेति । कथं शरीर-
परिगृहीते वायौ विकृतकर्मदर्शनात् । भस्त्राध्मापयितेव । निमेषोन्मेषकर्मणानुमीयते नियतेन च दारुयंत्रप्रयोक्तृवत् । देहस्य वृद्धिक्षतभग्नसंरोह-
णादिनिमित्तत्वात् । गृहपतिरिवाभिमतविषयग्राहकैः करणसंबंधनिमित्तेन मनःकर्मणा गृहकोणव्यवस्थितपेलकप्रेरकवद्दारकः । नयनविषयालो-
चनानंतरं रसानुस्मृतिक्रमेण रसनविक्रियादर्शनात् अनेकगवाक्षांतर्गतप्रेक्षकवदुभयदर्शी कश्चिद्विज्ञायते । सुखदुःखेच्छाद्वेषप्रयत्नैश्च गुणैर्गुण्यनुमीयते । ते
च न शरीरेंद्रियगुणाः कस्मात् अहंकारेणैकवाक्यताभावात् । प्रदेशवृत्तित्वादयावद्द्रव्यभावित्वाद्बाह्येंद्रियाप्रत्यक्षत्वाच्च । तथाहंशब्देनापि पृथिव्यादिशब्द-
व्यतिरेकादिति । तस्य गुणाः बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारसंख्यापरिमाणपृथक्त्वसंयोगविभागाः । आत्मलिंगाधिकारे
बुद्ध्यादयः प्रयत्नांताः सिद्धाः । धर्माधर्मावात्मांतरगुणानामकारण[illegible]त् । संस्कारः स्मृत्युत्पत्तौ च वचनात् । संख्या-

मा:४ दर्जना ।

॥५॥

ष्टयक्त्वमतएवात्तथाचात्मेतिवचनात्परममहत्परिमाणं।सन्निकर्षजन्यात्सुखादीनांसंयोगः।नद्विनाशकत्वाद्विभागइति॥ ॥८॥मन
स्वात्मसंबंधवान्मनः। मत्यथात्मेंद्रियार्थसंन्निधेर्ज्ञानसुखदुःखादीनामनुत्पत्तिदर्श नात्कारणांतरमनु
मीयतेऽथोच्य यद्व्यापारेच्चस्मृत्युत्पत्तिदर्शनात्।बाह्येन्द्रियैरगृहीतसु खादिग्राहकांत्र
रत्वाच्चेति। तस्यगुणाःसंख्यापरिमाणपृथक्त्वसंयोगविभागप रत्वापरत्वसं
स्काराः॥। अयतनज्ञानायोगपद्यवचनात्प्रतिशरीरमेकंसिद्धं।पृथ क्त्वमतएवात
दणुवचना दणुपरिमाणं।अपसर्पणोपसर्पणावचनात्संयोगवि भागो।मूर्त्तत्व
त्परत्वापरत्व संस्कारश्च।अस्पर्शवत्वाद्द्रव्यानारंभकत्वं।क्रियावत्त्वा न्मूर्त्तत्वंसाधा
रणाविग्रत्वमुसे गादंज।करणाणवैत्वैमावस्यपरार्थीगुणवत्वादुवौ।प्रयत्नादृष्ट परिग्रहवशादाशु
संचारीचेति॥ ॥ ।इतिद्रव्यपदार्थः॥ ॥९॥रक्षणीयंजलात्तैलाद्दुष्टबंधनादपि॥ ॥ ॥ अवश्यंपुरुषैःसद्भिः
पुस्तकंपापबुद्धितः॥॥॥७॥द्वादश्यांशुक्लवारस्वपुस्तकंलिखितंत्विदं।लेखमयाकाश्यांडोमदेवस्यसूनुना॥ ॥वेल्हणेश्वरायनमः॥ ॥७॥

6

हव

॥६॥

श्री

न्याय
द्रव्यपदार्थ

ग्रंथ १७००



